चचरीअणिणदप्पणज्जअपर मइउरो सुद्द्रावडतसुरहिपरिमिलो पिहादय-चुण्णवण्णअचित्तिअगअणाभित्तिओ समहुरसुणिज्जंतमहुपअखिलज्जंतगणि-आजणग्गीअपेसलो जुवजणधीरखिलीकरणकबाडओ वेसवाडओ ।

**रामः**—वयस्य सम्यगुपलक्षितम् ।

**आपादयंतो रतिलंपटानां**
**यूनाममी वीथिविहारमैत्रीम् ।**
**विलासिनीमाल्यविलेपगंधैः**
**स्त्यायंति सायंतनगंधवाहाः ॥ १३ ॥**

( अग्रतोऽवलोक्य )

**प्रत्यंगोद्भिद्यमानस्तनमुकुलकृतप्राभृतार्घ्यैरुरोभि-**
**र्दंतोन्मेषोपहारैः प्रहसितवदनैर्लोलनेत्रैर्वचोभिः ।**
**विभ्रांतोत्फुल्लनेत्रा ललितभुजलतामंदविक्षेपलीलाः**
**कंदर्पं दर्पयंत्यो भृशमिह गणिका दारिकाः संचरंति ॥ १४॥**

**विदूषकः**—वंअस्स पेक्ख एत्थ महामदविब्भमवेसवहूणं ।

**रामः**—( निर्वर्ण्य )

**अंसापांतविलंबिकेशरचनास्विद्यत्कपोलास्फुर—**
**द्बिंबोष्ठ्यो मधुपानमंथरपदन्यासस्वनन्नूपुरा ।**
**व्याकीर्णालकवासचूर्णकलुषा व्याघूर्णमानेक्षणा**
**लीना नृत्यरसेन वेशवनिता रथ्यामलंकुर्वते ॥ १५ ॥**

( नेपथ्ये )

एषा खलु भर्तृदारिका सीता कामदेवायतनपर्यंतोपवनदोलागृहे वसन्तदोलारोहणोपहारेण वसंतमाराधयितुमागमिष्यति । तदिदानीं ।

**इतस्तावत्सर्वाः परिजनवृता वेशवनिता**
**वसंतार्हाहार्यैर्द्विगुणितवसंतोत्सवगुणाः ।**

---

१ वयस्य पश्यात्र महामदविभ्रमवेशवधूनाम् ।

**विनीता**—सहिओ गच्छम्ह दाव कण्णअभवणं ता पुप्फावचअचाव-लादो परिब्भमदि सव्व पिअसहिअण गदुअ सहावेद ।

**सख्य**—ज पिअसहि भणादि ।

**विनीता**—भट्टिदारिए ओसरिदो सहिअणो जाव पुणो एसा पच्छागमिस्सादि ताव कामदेव अब्भत्थमो ।

**सीता**—तहा

( परिक्रामत )

**विनीता**—एदं कामदेवघरअं जाव पविसेम ।

( उभे प्रविशत )

**विदूषक**—वअस्स कहं इद एव्व पविसंति ता म बह्मणं पेक्खिअ नदाअहिवाहेइ परिअण्णो जाव अह अण्णदो गच्छेमि । ( निष्क्रांतः )

**विनीता**—( रामं दृष्ट्वा सविस्मय ) अह्मो को एसो ।

**सीता**—( दृष्ट्वा ससाध्वस ) अह्मो एसो खु सोम अणो ।

**विनीता**—भट्टिदारिए दिट्ठिआ सो खु देवो पसण्णो ससरीरो एव चिट्ठइ अग्गदो अणगो । ता इस्स दे उक्कठं विण्णवेमो ।

**सीता**—( सलज्जमजलिं बध्नाति )

**विनीता**—भअव ससरीरमम्मह एअ मे पिअसहि अणुरूवेण भरतुणा जोजेहि

---

१ सख्य गच्छाम तावत्कन्यकाभवन तस्मात्पुष्पाचयचापल्यत परिभ्रमति । सर्व प्रियसखिजनं गत्वा शब्दायते । २ यत्प्रियसखी भणति । ३ भर्तृदारिकेऽपसृत. सखीजनः यावत्पुनरेष प्रत्यागमिष्यति तावत्कामदेवमभ्यर्थयामः । ४ तथा। ५ एतत्कामदेवगृह यावत्प्रविशाम । ६ वयस्य कथमिदमेव प्रविशति तस्मान्मां ब्राह्मणं प्रेक्ष्य तदातिवाहयति परिजनो यावदहमन्यतो गच्छामि । ७ अहो क एष । ८ अहो एष खलु स मदन. ९ भर्तृदारिके दिष्ट्या स खलु देव प्रसन्न. सशरीर एव तिष्ठति अग्रतोऽनंग । तस्मादस्य ते उत्कठा विज्ञापयाम. । १० भगवन् सशरीरमन्मथ एता मे प्रियसखीमनुरूपेण भर्त्रा योजय ।

रामः—एवमेतत् इत्थं नाम प्रत्यक्षमपि कः पर्यालोचयेत् ।

विदूषकः—भँवं ।

रामः—( सस्मित ) कोऽन्यः ।

विदूषकः—णँ कोवि ।

रामः—वयस्य अलमुपालभ्य अनात्मज्ञत्वमप्युपालंभोपक्रममेव मन्मथव्यथायाः ।

विदूषकः—विसेसदो दाव वसंते ।

रामः—विशेषतो रामे इति च ब्रूहि । कुतः ।

शरसंधानचुम्बत्वं रामे रामासमुत्सुके ।
यथा कुसुमबाणस्य न तथाऽन्यत्र जातुचित् ॥ १४ ॥

विदूषकः—सँव्वोवि खु कामुओ अप्पाण एव्व समत्थेदि ।

रामः—तथा वास्तु ।

विदूषकः—वअस्स दक्ख दक्ख एसो खु महुबिंदुसिहरच्छटादूसरदाए सिसिरसमाअमसकं जणइदाणि सहआरो ।

रामः—सम्यगुपलक्षित । तथाहि ।

मधुरसपृषतप्रवर्षिणि सुखशिशिराः समुदीक्ष्य मंजरी ।
शिशिरसमयशंकयाकुला न जहति कोटरमध्यकोकिलाः ॥ १५ ॥

यावदेतान् प्रतिबोधयामि ।

त्यजत मधु सगंधाः कोकिला निर्विशंकं
तरुविटपकुटीराभ्यन्तरावासभेदम् ।
भजत सहचरीभिः सार्थमेतानिदानी-
मुपवनसहकारानुल्लसनमंजरीकान् ॥ १६ ॥

---

१ भवान् । २ न कोपि । ३ विशेषतस्तावद्वसंते । ४ सर्वोपि खलु कामुक आत्मानमेव समर्थयते । ५ वयस्य पश्य पश्यैष खलु मधुबिंदुसीकरच्छटाधूसरतया शिशिरसमागमशंका जनयतीदानीं सहकार ।

शीतांशुवदनां सीतां स्पृष्ट्वैव स्पर्शशीतलाम् ।
अपास्ततापमंगं मे शीतभावमवाप्स्यति ॥ २८ ॥

**विनीता**—(कर्ण दत्वा) [1]भट्टिदारिए इदो जणालावो विअ सुणिअदि।

**सीता**—[2]सहि इमिणा माहविगुम्मेणन्तरिदो दक्खम्म ।

**विनीता**—( तथा कृत्वा दृष्ट्वा च ) [3]भट्टदारिए दिट्ठिआ वड्ढसि एसो दे हिअअवल्लहो ।

**सीता**—( दृष्ट्वा सहर्ष सानुरागं चात्मगतं ) [4]हिअअ पडिअवट्ठावइ अप्पाणं किअत्थ खु दाणि दे जम्मं ( साकारा सवरणं ) [5]किं णु दाणि एदं दक्खंतिए किंपि वेपइ मे हिअअं ऊरुजुअलं च फुरइ वामच्छि अहरो अ सिथिली होइ णीविगंथि धीरं च किलम्मइ मणो सरीरं च ।

**विनीता**—[6]जइ एव्वं भट्टदारिए इमस्स वि जणस्स विवित्तदेसे कोवि सेरालाओ वट्टइ त सुणिस्सह्म ।

**सीता**—[7]जहं पिअसहीए रोआदि ।

**विनीता**—( विलोक्य ) [8]भट्टदारिए पेक्ख पग्गिदो सिसिरोवआरपरिअरं।

**सीता**—[9]किं तेण मे ।

**विनीता**—[10]भट्टदारिए तुए उक्कट्ठाए संदाविओ खु सो ।

**सीता**—[11]कैह अज्झवस्सिससि ।

---

१ भर्तृदारिके इतो जनालाप इव श्रूयते । २ सखि अमुना माधवीगुल्मेनात-रिते पश्याव: । ३ भर्तृदारिके दिष्ट्या वर्धसे एष ते हृदयवल्लभ: । ४ हृदय पर्यवस्थापय आत्मानं कृतार्थं खल्विदानीं ते जन्म । ५ किं नु इदानीमेत पश्यंत्या: किमपि वेपते मे हृदयमूरुयुगल च स्फुरति वामाक्षि अधरश्च, शिथिली भवति नीविग्रंथि धैर्यं च, क्लाम्यति मन शरीर च, । ६ यद्येव भर्तृदारिके अस्यापि जनस्य विविक्ते देशे कोपि स्वैरालापो वर्तते तं श्रोष्याव. । ७ यथा प्रियसख्यै रोचते । ८ भर्तृदारिके पश्य परित शिशिरोपचारपरिकरं । ९ किं तेन मे । १० भर्तृदारिके त्वय्युत्कंठया सतापित खलु स: । ११ कथमध्यवस्यसि ।

**ओसणसलिसठिईहिं अत्थिअहो उत्थिअं पदंतेहिं ।**
**चडुलणिउज्जंगेहिं गच्छियदि कच्छवेहि विअ ॥ २ ॥**

**वामनः**—( सहासं ) हिमाणए सुट्ठु कए उवालंभस्स पलिउवालंभे पिअसहा म हु मज्झं असूहेइ जाव दाणिं अहगे तुह्मे पसंसेवि सुणाह दाव ।

**पावंति लइम्मि दासिआओ**
**दिढपलिलंभउआलपुण्णआओ ।**
**हिअअं वि सहावउण्णअंतं**
**सुमहंतं ण खु अत्थि अण्णआणं ॥ ३ ॥**

**कुब्जः**—( सहास ) साहु पसंसिअं पिअसह तेण हि अहंपि तुह्मे पसंसिस्सं होमि ।

**देहाहिअउद्धपिट्ठिआ**
**णिहुवणचुंबिअणाहिकूविआ ।**
**अंसेसु कअग्गहत्थअं**
**उवऊहंति खु कोट्टिणीअणं ॥ ४ ॥**

**वामनः**—( सहास ) साहु पसंसिअ ।

**उभौ**—( सहासं ) अले सुसंगदं खु एअ णिउज्ज ।

**कुब्जः**—( उवहसेदि पससेदि अ कुज्ज णिउज्जोति । )

**वामनः**—अॅले दक्ख दाव अम्हालिसस्स लाअपालिवालस्स ।

---

१ आसनसदृश स्थितीभिरर्थंत उत्पत पतद्भि चटुलनिकुञ्जागै गम्यते कच्छपैरिव। २ अहो सुष्ठु कृतमुपालभस्य प्रत्युपालंभ प्रियसखे मा खलु मह्यमसूयय यावदिदानीं मह युष्मान् प्रशंसे । शृणु तावत् । प्राप्नुवति रतौ दास्य दृढपरिरंभमुदारपुण्यकाः । हृदयमपि स्वभावोन्नतं सुमहत्त्व न खल्वस्त्यन्येषाम् । ३ साधु प्रशंसित प्रियसखे तेन हि अहमपि युष्मान् प्रशंसित भवामि । देहाधिके र्ध्वपृष्ठका निधुवनचुम्बितनाभिकूपिका । अंशेषु कचग्रहार्थमुपगूहंति खलु कुट्टिनीजन । ४ साधु प्रशंसित । ५ अरे सुसंगतं खलु एतं निकुज । ६ उपहसति प्रशंसति च कुब्जं निकुब्ज इति । ७ अरे पश्य तावदस्मादृशस्य राजपरिवारस्य ।

गआए पिअसंहिए कोमुदीआए। ता तुए सिग्घ आणिअ आअंतव्वति जाव तहिं गच्छेमि। ( परिक्रामति )

**प्रथमा**—( विलोक्य ) का[1] उण एसा इदो अभिवट्टइ ( निरूप्य ) कह[2] पिअसहि सुहुमारिआ।

**द्वितीया**—( दृष्ट्वा ) कह[3] पिअसहि कोमुदीआ।

**प्रथमा**—सहि[4] कुदो आअच्छसि।

**द्वितीया**—हैला[5] कोमुदीए अह खु इदो आअच्छंतीए तुमं चिराअसित्ति दाणि दु भट्टदारिआए अग्गदो णिउत्ता। कि तुए सज्जीकअंन्तं धाराघरअं।

**प्रथमा**—ओम[6]।

**द्वितीया**—हैला[7] चिट्ठदु एअं को णु एसो भट्टिदारिआए संदाओ जो सिसिरोवआरेहिंपि पच्चहं वड्ढदि।

**प्रथमा**—रहस्से[8] खु दाव अप्पावि संकिदव्वो।

**द्वितीया**—एव्व[9] एदं तहवि रहस्सेति भणंति। अइमेत्तं मं ऊसिएसि।

**प्रथमा**—कह[10] वा पिअसहिए रहस्सं रक्खेमि सुणाहि दाव।

**द्वितीया**—अवहिदह्मि[11]।

---

१ का पुनरेषा इतो अभिवर्तते। २ कथ प्रियसखी सुकुमारिका। ३ कथं प्रियसखी कौमुदीका। ४ सखि कुत आगच्छसि। ५ सखि कौमुदिके अहं खलु इत आगच्छंत्यास्त्व चिरायसीतीदानीं तु भर्तृदारिकया अग्रतो नियुक्ता। किं त्वया सज्जीकृतं तद्धारागृहं। ६ ओम् ( स्वीकारे )। ७ सखि तिष्ठत्वेतत् का नु एषो भर्तृदारिकायाः सतापो य. शिशिरोपचारैरपि प्रत्यहं। ८ रहस्ये खलु तावदात्मापि शङ्कितव्य। ९ एवमेतत्तथापि रहस्यमिति भणति। अतिमात्रं मामुत्सुकयसि। १० कथं वा प्रियसख्या रहस्यं रक्षामि शृणु तावत्। ११ अवहितास्मि।

**विदूषकः**—भो[1] वअस्स पेक्ख पेक्ख मअरद्धअविजअरज्जाहिसेअसलिलप्पवाहस्स विअ सोहग्गं जोह्णापूरस्स ।

**रामः**—( निर्वर्ण्य ) हत शोचनीयाः खलु विरहिणः । ते हि

**प्रसर्पन्तीं ज्योत्स्नां मदनविजयारम्भरभसा**
**प्रमर्दोत्थां धूलिं किल वियति पश्यन्ति विधुराः ।**
**किमन्यं मन्यन्ते मलयगिरिवान्तांश्च पवनान्**
**सकोपं प्रोन्मुक्तान्यममहिषशूत्कारमरुतः ॥ २ ॥**

**विदूषकः**—[2]वअस्स किं ण णिव्वावेदि तुह हिअअं एसा णीहारविंदुकोमला कठावलंबिणी हारलदा ।

**रामः**—वयस्य मैवं पश्य ।

**न सोऽयं शीतांशुर्जरठतपनो रविरसौ**
**न चैषा ज्योत्स्नाया शिखि सुहृदसावातपशिखा ।**
**न चैते हारा यत्तरणिमणिमाला स्फुटमिमा**
**न चेदंगान्येव प्रियसख तपेयुः कथमिव ॥ ३ ॥**

**विदूषकः**—[3]हत कहं एसो वड्ढदि संदावं वअस्सस्स वह्मबंधुकुमुदिणीबंधू ।

**रामः**—वयस्य आदेशय मार्गं प्रमदवनस्य ।

**विदूषकः**—[4]एअं उत्तरदो माहवीवणं एसा अ इमस्स दक्खिणदो पुप्फवाडिआ जाव इमाणं अंतरेण गच्छम्ह ता इदो पिअवअस्सो ।

( परिक्रामतः )

---

१ भो वयस्य पश्य पश्य मकरध्वजविजयराज्याभिषेकसलिलप्रवाहस्येव सौभाग्यं जोत्स्नापूरस्य । २ वयस्य किं न निर्वापयति तव हृदयं एषा नीहारविंदुकोमला कठावलंबिनी हारलता । ३ हत कथमेष वर्धयते संतापं वयस्यस्य ब्रह्मबंधुकुमुदिनीबंधुः । ४ एतदुत्तरतो माधवीवनं एषा चास्य दक्षिणतो पुष्पवाटिका यावदनयोरंतरेण गच्छाव तस्मादित प्रियवयस्य ।

सिदा तक्कालसण्णिहिदेण भट्टिणा रामेण तह दाणिंवि सो तुमं सम स्सासइस्सिदि।

**सीता**—को वा अदोवि परं समस्सासणकालो।

**विनीता**—( आत्मगतं ) जाँव भट्टा आअच्छेदि दाव भट्टिदारिअं अणुऊलेण कीलावदेसेण विणूदेमि ( प्रकाशं ) भट्टिदारिए जाव माहविवणउन्ततं अभिणअंतीए कंपि वेलं अदिवाहेमो।

**सीता**—हला साहु भणिअं।

**विनीता**—तेणें हि अह भट्टा रामो होमि तुम पुण भट्टिदारिआ चेअ होहि।

**सीता**—हला जुत्त आचक्खिअ।

**विदूषकः**—कँह पुप्फगंधिआ पउत्ता।

**रामः**—वयस्य निभृतमवलोकयामः।

विनीता—( रामभूमिकां गृहीत्वा मदनावस्थामभिनीय ) अहो मकरकेतनस्य रणरणिकशालिता।

> **कुसुमवृष्टिरसौ कुसुमेषुना**
> **कुसुमचापधरेण निपातिता**
> **विजयिनः पुनरस्य निपातिता**
> **कुसुमवृष्टिरभूज्जयशंसिनी ॥ ११ ॥**

---

१ को वा अतोपि परं समाश्वासनकालः। २ यावद्भर्तागच्छति तावद्भर्तृदारिकामनुकूलेन क्रीडापदेशेन विनोदयामि। ३ भर्तृदारिके यावन्माधविवनवृत्तान्तमभिनयन्त्य कामपि वेलामतिवाहयामः। ४ हला साधु भणितं। ५ तेन हि अहं भर्ता रामो भवामि त्वं पुनर्भर्तृदारिकैव भव। ६ हला युक्तमाख्यातं। ७ कथं पुष्पगंधिका प्रवृत्ता। ८ रणप्राचुर्यशालिता।

अहं तु पुनरित्थं समर्थये ।

यस्य स्याद्बाहुरेकोऽप्यचलपरिवृढं मंदरं धर्तुमीशो
यस्य भ्रूक्षेपमात्रं क्षिपति जगदरिक्षत्रवित्रासदक्षम् ।
रामेणारोप्यमाणं सभयमिव धनुस्तेन तत्स्यादधिज्यं
नोचेन्न स्यादधिज्यं ध्रुवमसहनसन्मानिभिर्वध्यमानैः॥८॥

( विलोक्य ) कौ पुनरिमौ ।

अन्योन्यमन्यूनमनोज्ञकांती
सह प्रयांताविव पुष्पदंतौ ।
इद्रप्रतीद्राविव चावतीर्णौ
नेत्रे इव द्वे जगतां त्रयस्य ॥ ९ ॥

( निरूप्य ) ।

सोऽयं रामः समासन्नः सीतोद्वाहो रघूद्वहः ।
सोऽयं प्रतिनिधिः कांत्या लक्ष्मणः शशलक्षणः ॥ १० ॥

यावदिदानीमितस्तावदह महाराजाय निर्वर्तितं नियोग निवेदयामि ।

( परिक्रम्य निष्क्रांत )

---

## शुद्धविष्कंभः

( ततः प्रविशति रामो लक्ष्मणश्च )

**रामः**—( सौत्सुक्यमात्मगतं ) अहो प्रिया हि नाम जनस्य संमोहिनी विद्या । मम हि ।

तद्बिंबाधरपानमीप्सितमुखं गात्रं तदाश्लेषणं
श्रोत्रे तद्वचनश्रुतौ व्यसनिते नेत्रे तदालोकने ।

तत्किं कर्तुमलं बलाद्गजरिपौ दंतार्पितांघ्रिद्वये
मस्तिष्काहरणाय मस्तकतटं स्वच्छंदमुच्छिंदति ॥ ४३ ॥

( आकाशे )

श्लाघाभूमिर्बलस्य क्षपितरिपुबलं पश्यतास्यानुभावं
स्थैर्यारूढा हि सप्तक्षितिधरपतयश्चाष्टमश्चैष रामः ।
पश्यंति ज्ञाननेत्रा यदनघमृषयश्चात्तचारित्रनिष्ठाः
कैवल्यं प्राप्तुकामा हितमिह तदिहामुत्र च ब्रह्मदृष्टम् ॥ ४४ ॥

**लक्ष्मणो जनकश्च**—( श्रुत्वा ) कथमसौ चरमदेहधारी पुरुषोत्तमः ।

( सर्वे प्रणमंति )

**लक्ष्मणः**—आर्य पश्य पश्य ।

श्रुत्वा जगद्विस्मयनीयकीर्ति
कीर्तिं सुरेन्द्रैस्तव कीर्त्यमानाम् ।
भक्त्या भवंतं परितः स्तुवंतो
नमंति बद्धांजलयो नरेंद्राः ॥ ४५ ॥

**जनकः**— भृंगारस्तावत ।

**विनीता**—( उत्थाय नाट्येनादाय ) इदो सण्णिहिदो रअणभिंगारओ[1] ।
( उपनयति )

**जनकः**—( उत्थाय नाट्येन गृहीत्वा राममुपसृत्य ] भद्रे विनीते भद्रां सीतामिहैवानय ।

**विनीता**—जं महाराओ आणवदि[2] । ( तथाकरोति )

**जनकः**—

उर्वीं पालयितुं गुर्वीं सरत्नाकरमेखलाम् ।
राम प्रभवते दत्ता सीतासौ भवते मया ॥ ४६ ॥

---

१ इत सन्निहितो रत्नभृंगार । २ यन्महाराज आज्ञापयति ।

